
मेघदूतः

५१२



नं० ५९२५

मेघदूतम्

५५

काव्य

[redacted]

१६

कर्त्ता

श्री कालिदास:

शाद्स्पवकं दर्पस्फतत्प्रस्यगुरुडुरुः नामकीर्तनमात्रेण पुण्यपानस्य तितिकाणां द नि रूस्पनामोच्चारो न रु वितः १ सदापुष्पफलाघाश्वतेछाया
तश्वरवः स्तरताः २
कुवेरस्प २
परिरचकस्साधानो गजप्रेक्षणीयो मतः ४

मे-दू-
।।२।।
पूर्वान्हेवापयन्हे वा जाति पत्निपत्तिर्धोयवत्र दिवसे अकाराबासूर्दं वस्पेस्तो दिवसेमकाद शीयापंवित्तार्ण ४

।।श्रीगणेशायनमः।।ॐ।। कश्चित्कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः ।। यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ।।१।। तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः ।। आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ।।२।। तस्य स्थित्वा कथमपि पुरः केतकाधानहेतोरन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।। मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ।।३।। प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम् ।। स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ।।४।। धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।। इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।।५।। जातं वंशे भुवनविदिते पुष्करावर्तकानां जानामि त्वां प्रकृतिपु

वसतीरात्रिवेश्मतोः २
अविरहितस्पापि ५
नूतनैः ७ दत्तिरूपवा णाडाणिवि-ना २
रामः
।।२।।

समर्थेन्द्रियैर्यहलप्रतिपादनसमर्थैः २ शैतन्यंवंतमचैतनं ज्ञातुं न प्रभवंति। एतेन कविनास्वेरापरिहारः स्फुवितोः वेतनस्पापि मेघस्य दूतेसंयोजनं नासंगतमनुरागहेतुः कामिनामितिभावः १

अनापृच्छ्य स्वप्रियसखमम्मुं तुंगमालिंग्य शैलं वंद्यैः पुंसां रघुपतिपदैरंकितं मेखलासु ॥
काले काले भवति भवतो यस्य संयोगमेत्य स्नेहव्यक्तिश्चिरविरहजं मुंचतो बाष्पमुष्णं ॥ १२ ॥
तेन त्वया मम प्रार्थ्ये ऽयमर्थः आकाशं ५

तुषं कामरूपं मघोनः ॥ तेनार्थित्वं त्वयि विधिवशाद्दूरबंधुर्गतोहं याच्ञा मोघा वरमधिगुणे ना-
धमे लब्धकामा ॥ ६ ॥ संतप्तानां त्वमसि शरणं तत्पयोद प्रियायाः संदेशं मे हर धनपतिक्रोधवि-
श्लेषितस्य ॥ गंतव्या ते वसतिरलका नाम यक्षेश्वराणां बाह्योद्यानस्थितहरशिरश्चंद्रिकाधौत-
हर्म्या ॥ ७ ॥ त्वामारूढं पवनपदवीमुद्गृहीतालकांताः प्रेक्षिष्यंते पथिकवनिताः प्रत्ययादाश्वसं-
अवधीरयेत ५ त्यः ॥ कः संनद्धे विरहविधुरां त्वय्युपेक्षेत जायां न स्यादन्योप्यहमिव जनो यः पराधीनवृत्तिः ॥ ८ ॥
मंदं मंदं नुदति पवनश्चानुकूलो यथा त्वां वामश्चायं नदति मधुरं चातकस्ते सगर्वः ॥ गर्भाधानक्ष-
णपरिचयान्नूनमाबद्धमालाः सेविष्यंते नयनसुभगं खे भवंतं बलाकाः ॥ ९ ॥ तां चावश्यं दिवस-
१९ कोहमेव पतिपस्सा ३ गणनातत्परामेकपत्नीमव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायां ॥ आशाबंधः कुसुम- आशाबंधः समा-
सदृशं प्रायशो ह्यंगनानां सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥ १० ॥ कर्तुं यच्च प्रभवति म- श्वासनप्रायः कर-
हीमुच्छिलींध्रामवंध्यां तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ॥ आकैलासाद्बिसकिस- जालके ३

जो मयः छत्रिकामाहुः शिलींध्रामिति तद्विदुः १

बलाका बकपंक्तिः स्याद्बलाका बिसकंठिका: ५

प१

मे॰दू॰ लपच्छेदपाथेयवंतः। संपत्स्यंते नभसि भवतो राजहंसाः सहायाः ॥११॥ आपृच्छस्व प्रियसखम
२ मुं तुंगमालिंग्य शैलं वंद्यैः पुंसां रघुपतिपदैरंकितं मेखलासु ॥ काले काले भवति भवतो यस्य सं
२ योगमेत्य स्नेहव्यक्तिश्चिरविरहजं मुंचतो बाष्पमुष्णं ॥१२॥ मार्गं तावच्छृणु कथयतस्त्वत्प्रया
नु४ णानुरूपं संदेशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयं ॥ खिन्नः खिन्नः शिखरिषु पदं न्यस्य गंतासि
यत्र क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य ॥१३॥ अद्रेः शृंगं हरति पवनः किंस्विदित्यु
न्मुखीभिर्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धांगनाभिः ॥ स्थानादस्मात्सरसनिचुलादु निचुलो वुजइजलः ५
त्पतोदङ्मुखः खं दिङ्नागानां पथि परिहरन्स्थूलहस्तावलेपान् ॥१४॥ रत्नच्छायाव्यतिकर इ
व प्रेक्ष्यमेतत्पुरस्ताद्वल्मीकाग्रात्प्रभवति धनुःखंडमाखंडलस्य ॥ येन श्यामं वपुरतितरां कांतिमाप
त्स्यते ते बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥१५॥ त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभि
ज्ञैः प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ॥ सद्यःसीरोत्कषणसुरभि क्षेत्रमारुह्य मालं किंचित्प राम

वल्मीकः सातपोमेघरश्मिमेदिनी करः ३ २

ऽद्रौ जललघुगतिर्भूय एवोत्तरेण ॥ १६ ॥ त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना वक्ष्यत्यध्वश्रमपरिगतं सा
नुमानाम्रकूटः ॥ न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥ १७ ॥
अध्वक्लान्तं प्रतिमुखगतं सानुमानाम्रकूटस्तुङ्गेन त्वां जलदशिरसा वक्ष्यति श्लाघमानः ॥ आसारेण त्वमपि
शमयेस्तस्य नैदाघमग्निं सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु ॥ १८ ॥ छन्नोपान्तः परिणतफलद्योति
भिः काननाम्रैः त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे ॥ नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्था
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥ १९ ॥ स्थित्वा तस्मिन्वनचरवधूभुक्तकुञ्जे मुहूर्तं तोयोत्सर्ग
द्रुततरगतिस्तत्परं वर्त्म तीर्णः ॥ रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां भक्तिच्छेदैरिव विरचितां भूति अध्वारवनवोमक्तिः ४
मङ्गे गजस्य ॥ २० ॥ तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टिर्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ॥ अ
उन्नेयपितुं २ न्तः सारं घन तुलयितुं नानिलः शक्ष्यति त्वां रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥ २१ ॥ नीपं दृष्ट्वा कदंबं
हरितकपिशं केसरैरर्धरूढैराविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छं ॥ दग्धारण्येष्वधिकसुरभिं गन्धमाघ्रा

नवाङ्कुराः

वासितं भावितं त्रिषु २ ज भूर्निर्मश्यमित्यपदि ४

मे॰दू॰
३

सारंगश्चातके भृंगे कुरंगे च मतंगजे। चतुर्णामपि सारंगाणां पदुपयोगः स्यात्तस्य जललेशादृपेनेव संभवात्। तेन चत्वारः। तेन याववपंथानमनुमेष्यंति २
भूजंगभोजी वर्हिणः शुक्लापांगश्च वर्हिण इति धरणिधरः ४

केका वाणी मयूरस्य ४

य चौर्व्याः सारंगास्ते जललवमुचः सूचयिष्यंति मार्गं ॥ २२ ॥ अंभोविंदुग्रहणरभसांश्चातकान्वीक्षमाणाः श्रे
णीभूताः परिगणनया निर्दिशंतो बलाकाः ॥ त्वामासाद्यस्तनितसमये मानयिष्यंति सिद्धाः सोत्कंठा
नि प्रियसहचरीसंभ्रमालिंगितानि ॥ २३ ॥ उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः कालक्षेपं क
कुभसुरभौ पर्वते पर्वते ते ॥ शुक्लापांगैः सजलनयनैः स्वागतीकृत्य केकाः प्रत्युद्यातः कथमपि भवान्गंतुमा
शु व्यवस्येत ॥ २४ ॥ पांडुच्छायोपवनवृतयः केतकैः सूचिभिन्नैर्नीडारंभैर्गृहबलिभुजामाकुलग्रामचै
त्याः ॥ त्वय्यासन्ने परिणतफलश्यामजंबूवनांताः संपत्स्यंते कतिपयदिनस्थायिहंसा दशार्णाः ॥ २५ ॥
तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा ॥ तीरोपां
तस्तनितसुभगं पास्यसि स्वादुयुक्तं सभ्रूभंगं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥ २६ ॥ नीचैराख्यं गि
रिमधिवसेस्तत्र विश्रामहेतोस्त्वत्संपर्कात्पुलकितमिव प्रौढपुष्पैः कदंबैः ॥ यः पण्यस्त्रीरतिपरिमलो
द्गारिभिर्नागराणामुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २७ ॥ विश्रांतः सन्व्रज नगनदीती

पण्यस्त्री गणिका वेश्या रूपाजीवा च वारजनेरित्यमरः २

वेतस्मा पतने बुद्धेवि नेपुद्देशपादपे इति रभसः ५ गर्भकंडक विशारितैः ५

लब्धेति पाठः

राम
३

गणिका यूथिकेस
पर:= जे होति भाषा.

रजातानि सिंचन्नुद्यानानां नवजलकणैर्यूथिकाजालकानि ॥ गंडस्वेदापनयनरुजाक्लांतकर्णोत्पला-
नां छायादानात्क्षणपरिचितः पुष्पलावीमुखानां ॥ २६ ॥ वक्रः पंथा यदपि भवतः प्रस्थितस्योत्तराशां सौ-
धोत्संगप्रणयविमुखो मा स्म भूरुज्जयिन्याः ॥ विद्युद्दामस्फुरितचकितैस्तत्र पौरांगनानां लोलापांगैर्यदि
न रमसे लोचनैर्वंचितोसि ॥ २७ ॥ वीचिक्षोभस्तनितविहगश्रेणिकांचीगुणायाः संसर्पंत्याः स्खलितसुभ-
गं दर्शितावर्त्तनाभेः ॥ निर्विंध्यायाः पथि भव रसाभ्यंतरैः संनिपत्य स्त्रीणामाद्यं प्रणयिवचनं विभ्रमो हि प्रिये-
षु ॥ २८ ॥ वेणीभूतप्रतनुसलिलां तामतीतस्य सिंधुः पांडुच्छाया तटरुहतरुभ्रंसिभिः शीर्णपर्णैः ॥ सौभा-
ग्यं ते सुभग विरहावस्थया व्यंजयंती कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥ २९ ॥ प्राप्यावंतीमुद- उ
यनकथाकोविदग्रामवृद्धान्पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालां ॥ स्वल्पीभूते सुचरितफले-
तिष्ठती निशेषः स्वर्गिणां गां गतानां शेषैः पुण्यैर्हृतमिव दिवः कांतिमत्खंडमेकं ॥ ३० ॥ दीर्घीकुर्वन्पटु मदकलं कूजि-
तं सारसानां प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ॥ यत्र स्त्रीणां हरति सुरतग्लानिमंगानुकूल-

सुगंधो रसभेदेवकषायो वर्णभेदके १ विशाला त्रिंडवारुण्यां विशाला नोज्जयन्यपि इ

चाटु र्म्लेशि प्रियोक्तिः स्यात्। चाटु चाटु प्रियं वाक्यमित्यपि १

मुक्ता स्फोटस्त्रियां शुक्तिः शंखस्यात्कंबुरस्त्रियो १

मुक्ता शुद्धौ तु तारस्यात्तारो मंदध्वनोऽस्त्रतः १

मे॰ दू॰

॥४॥

= जो कैरिति तोयः:

५

खड्गे चंद्रहासासि रिष्टयः ५

त्वानः। शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः॥३३॥ हारांस्तारांस्तरलगुटिकान्कोटिशः शंखशुक्तीः श
ष्पश्यामान्मरकतमणीनुन्मयूखप्ररोहान्॥ दृष्ट्वा यस्यां विपणिरचितान्विद्रुमाणां च भंगान्संलक्ष्य
ते शलिलनिधयस्तोयमात्रावशेषाः॥३४॥ सद्यश्श्यामादिनकरहयस्पर्द्धिनो यत्र वाहाः शैलोदग्रा
स्त्वमिव करिणो वृष्टिमंतः प्रभेदात्॥ योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः प्रत्यादिष्टाभरण
रुचयश्चंद्रहासव्रणांकैः॥३५॥ प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे हैमं तालद्रुमवनमभूदत्र तस्यै
व राज्ञः॥ अत्रोद्भ्रांतः किल नलगिरिस्तंभमुत्पाट्य दर्प्पादित्यागंतून्रमयति जनो यत्र बंधूनभिज्ञः॥
३६॥ जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपैर्बंधुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः॥ ह
र्म्येष्वस्याः कुसुमसुरभिष्वध्वखिन्नांतरात्मा मुक्त्वा खेदं ललितवनितापादरागांकितेषु॥३७॥ भ
र्तुः कंठच्छविरिति गणैः सादरं वीक्ष्यमाणः पुण्यं यायास्त्रिभुवनगुरोर्द्धाम चंडीश्वरस्य॥ धूतोद्
यानं कुवलयरजोगंधिभिर्गंधवत्याः स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः॥३८॥

राम

॥४॥

रसभेदे सुगंधे च तिक्तः इत्यभिधीयते १

ओड्रपुष्पं जपापुष्पं ५

युग्मं ॥ अप्यन्यस्मिन् जलधर महाकालमासाद्य काले स्थातव्यं ते नयनविषयं यावदत्येति भानुः ॥ कुर्वन्सं
ध्यावलिपटहतां शूलिनः श्लाघनीयामामंद्राणां फलमविकलं लप्स्यसे गर्जितानां ॥ ३९ ॥ पादन्यासक्व
णितरसनास्तत्र लीलावधूतै रत्नच्छायाखचितवलिभिश्चामरैः क्लांतहस्ताः वेश्यास्त्वत्तो नखपदसुखान्प्रा
प्यवर्षाग्रबिंदूनामोक्ष्यंते त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान् ॥ ४० ॥ पश्चादुच्चैर्भुजतरुवनं मंडलेनाभि
लीनः सांध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः ॥ नृत्यारंभे हर पशुपतेरार्द्रनागाजिनेच्छां शांतोद्वेग
स्तिमितनयनं दृष्टभक्तिर्भवान्या ॥ ४१ ॥ गच्छंतीनां रमणवसतिं योषितां तत्र नक्तं रुद्धालोके नरपतिप
थे सूचिभेद्यैस्तमोभिः ॥ सौदामिन्या कनकनिकषस्निग्धया दर्शयोर्वीं तोयोत्सर्गस्तनितमुखरो मा स्म
भूर्विक्लवास्ताः ॥ ४२ ॥ तां कस्यांचिद्भवनवलभौ सुप्तपारावतायां नीत्वा रात्रिं चिरविलसनात्खिन्नवि
द्युत्कलत्रः ॥ दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं मंदायंते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥

मे.दू.
॥ ५ ॥
5

४३ ॥ तस्मिन्काले नयनसलिलं योषितां खण्डितानां शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ॥ प्रा
लेयाश्रं कमलवदनात्सोऽपि हर्तुं नलिन्याः प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥ ४४ ॥ गंभी
रायाः पयसि सरितश्चेतसीव प्रसन्ने छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशं ॥ तस्मादस्याः कु
मुदविशदान्यर्हसि त्वं न धैर्यान्मोघीकर्तुं चटुलशफरोद्वर्त्तनप्रेक्षितानि ॥ ४५ ॥ तस्याः किंचित्क
रधृतमिव प्राप्तवानीरशाखं हृत्वा नीलं सलिलवसनं मुक्तरोधोनितंबं ॥ प्रस्थानं ते कथमपि स
खे लंबमानस्य भाविज्ञातास्वादो विपुलजघनां को विहातुं समर्थः ॥ ४६ ॥ त्वन्निष्यंदोच्छ्वसितव
सुधागंधसंपर्करम्यः स्रोतोरंध्रध्वनितसुभगं दंतिभिः पीयमानः ॥ नीचैर्वास्यत्युपजिगमिषो
र्देवपूर्वं गिरिं ते शीतो वायुः परिणमयिता काननोदुंबराणां ॥ ४७ ॥ तत्र स्कंदं नियतवसतिं पुष्प
मेघीकृतात्मा पुष्पासारैः स्नपयतु भवान्व्योमगंगाजलार्द्रैः ॥ रक्षाहेतोर्नववशिभृता वासवीनां

राम
॥ ५ ॥

चमूनामत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ॥ ४८ ॥ ज्योतिर्ल्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवयदलस्पर्द्धि कर्णे करोति ॥ धौतापांगं हरशशिरुचा पावकेस्तं मयूरं पश्चादद्रिग्रह
णगुरुभिर्गर्जितैर्नर्त्तयेथाः ॥ ४९ ॥ आराध्यैनं शरवणभुवं देवमुल्लंघिताध्वा सिद्धद्वंद्वैर्जलकणभ चर्म्मण्वतीहयल ४
यात्वीणिभिर्मुक्तमार्गः ॥ व्यालंवेथाः सुरभितनयालंभजां मानयिष्यन् स्रोतोमूर्त्या भुवि परिण
तां रंतिदेवस्य कीर्त्तिं ॥ ५० ॥ त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचोरे रस्याः सिंधोः पृथुमपित
नुं दूरभावात्प्रवाहं ॥ प्रेक्षिष्यंते गगनगतयो नूनमावर्ज्य दृष्टीरेकं मुक्तागुणमिव भुवः स्थूलम
ध्येंद्रनीलं ॥ ५१ ॥ तामुत्तीर्य्य व्रजपरिचितभ्रूलताविभ्रमाणां पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णसा
रप्रभाणां कुंदक्षेपानुगमधुकरश्रीमुखामात्मबिंबं पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानां ॥
५२ ॥ ब्रह्मावर्त्तं जनपदमथच्छायया गाहमानः क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तत् भजेथाः ॥ राज

सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं । तद्देव २१
तं पुण्यतमब्रह्मावर्त्तं प्रचक्षते ॥

मे॰ दू॰
६
6

हालापरिमुक्तमदिरा२

मानां शितशरशतैर्यत्र गांडीवधन्वा धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥५३॥ हित्वा
हालामभिमतरसां रेवतीलोचनांकां बंधुप्रित्या समरविमुखो लांगली याः शिषेवे ॥ कृत्वा ता
सामभिगमनपां सौम्य सारस्वतीनामंतःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥५४॥ तस्माद्ग
च्छेरनुकनखलं शैलराजावतीर्णां जन्होः कन्यां सगरतनयस्वर्गसोपानपंक्तिं ॥ गौरीवक्त्रभ्रुकु
टिरचनां या विहस्येव फेनैः शंभोः केशग्रहणमकरोदिंदुलग्नोर्मिहस्ता ॥५५॥ तस्याः पातुं सुर
गज इव व्योम्नि पूर्वार्द्धलंबी त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगंभः ॥ संसर्प्पत्याः सपदि भवतः स्रोतसि [illegible]
छायया पासा स्यादस्थानोपगतयमुनासंगमेवाभिरामा ॥५६॥ आसीनानां सुरभितशिलं नाभिगंधैर्मृ
गाणां तस्याः एव प्रभवमचलं प्राप्य गौरं तुषारैः ॥ वक्ष्यस्यध्वश्रमविनयने तस्य शृंगे निषण्णः शोभां शुभ्र
त्रिनयनवृषोत्खातपंकोपमेयां ॥५७॥ तं चेद्वायौ सरति सरलस्कंधसंघट्टजन्मा बाधेतोल्काक्षपित राम
६

चमरीवालभारो दवाग्निः ॥ अर्हस्येनं शमयितुमलं वारिधारासहस्रैरापन्नार्त्तिप्रशमनफलाः संपदो ह्यु
त्तमानां ॥ ५४ ॥ ये संरम्भोत्पतनरभसाः स्वांगभंगाय तस्मिन्दर्प्पोद्रिक्तादुपरि सरभाः लंघयेयुर्भवन्तं
तान्कुर्वीथास्तुमुलकरकावृष्टिहासावकीर्णान्के वा न स्युः परिभवपदं निष्फलारंभयत्नाः ॥ ५५
तत्र व्यक्तं दृषदि चरणन्यासमर्द्धेन्दुमौलेः शश्वत्सिद्धैरुपहृतबलिं भक्तिनम्रः परीयाः ॥ यस्मिन्दृष्टे
करणविगमादूर्ध्वमुद्धूतपापाः संकल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ५६ ॥ शब्दायन्ते मधुरमनि
लैः कीचकाः पूर्य्यमाणाः संरक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः ॥ निर्ह्रादी मुरज इव चेत्कंदरेषु ध्वनिः ने४
स्यात्संगीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥ ५७ ॥ प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषान्हं
सद्वारं भृगुपतियशोवर्त्म यत्क्रौंचरंध्रं ॥ तेनोदीचीं दिशमनुसरेस्तिर्य्यगायामशोभी श्यामः पादो बलिनि
यमनाभ्युद्यतस्येव विष्णोः ॥ ५८ ॥ गत्वा चोर्द्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसंधेः कैलासस्य त्रिदशवनिता

मे.दू.
॥७॥
7

दर्पणस्यातिथिःस्याः॥ शृंगोछ्रायैःकुमुदविशदैर्योवितत्यास्थितःखंराशीभूतःप्रतिदिशमिवत्र्यंबकस्या
ट्टहासः॥६३॥उत्पश्यामित्वयितटगतेस्निग्धभिन्नांजनाभेसद्यःकृत्तद्विरदशनछेदगौरस्यतस्य॥शो
भामद्रेःस्तिमितनयनप्रेक्षणीयांभवित्रीमंसन्यस्तेसतिहलभृतोमेचकेवाससीव॥६४॥तस्मिन्हि
त्वाभुजगवलयंशंभुनादत्तहस्ताक्रीडाशैलेयदिचविचरेत्पादचारेणगौरी॥भंगीभक्त्याविरचित
वपुःस्तंभितान्तर्जलौघःसोपानत्वंकुरुमणितटारोहणायाग्रयायी॥६५॥तत्रावश्यंवलयकुलिश
ोद्घट्टनोद्गीर्णतोयंनेष्यन्तित्वांसुरयुवतयोयंत्रधारागृहत्वं॥ताभ्योमोक्षस्तवयदिसखेघर्म्मल
ब्धस्यनस्यात्क्रीडालोलाःश्रवणपरुषैर्गर्जितैर्भीषयेस्ताः॥६६॥हेमांभोजप्रसविसलिलंमानसस्या
ददानःकुर्वन्कामंक्षणमुखपटप्रीतिमैरावणस्य॥धुन्वन्कल्पद्रुमकिशलयान्यंशुकानीववातैर्ना
नाचेष्टैर्जलदललितैर्निर्विशेस्तंनगेंद्रं॥६७॥तस्योत्संगेप्रणयिनइवस्रस्तगंगादुकूलांनत्वंदृष्ट्वान

राम
॥७॥

पुनर्नलकोद्गास्पसेकाममावानिन् ॥ यावः कालेवहतिसलिलोद्गारमुच्चैर्विमानैर्मुक्ताजालग्रथितमलकं कामि
नीनामभ्रवृन्दं ॥ ६८ ॥ विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः संगीताय प्रहतमुरजाः स्निग्धगंभीरघोषः
॥ अन्तस्तोयं मणिमयभुवस्तुंगमभ्रंलिहाग्राः प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ ६९ ॥ हस्ते ली
लाकमलमलके बालकुंदानुविद्धं नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ॥ चूडापाशे नवकुरवकं चारु
कर्णे शिरीषं सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनां ॥ ७० ॥ यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ॥ आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं त्वद्गंभीरध्वनि
षु शनकैः पुष्करेष्वाहतेषु ॥ ७१ ॥ गत्युत्कंपादलकपतितैर्यत्र मंदारपुष्पैः पत्रच्छेदैः कनकनलिनैः कर्णविस्रंसि
भिश्च ॥ मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारैर्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनां ॥ ७२ ॥
नीवीबंधोच्छ्वसितशिथिलं यत्र यक्षांगनानां वासः कामादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ॥ अर्चिस्तुंगा

पुष्करं करिहस्ताग्रे नाद्यभांडमुखे जले गमनेकमर्ले चैव तीर्थभेदे पिकष्यते ३

मे०दू० न्नभिमुखामपि प्राप्य रत्नप्रदीपान् ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ||७३|| आनन्दोत्थं नयनस

||१८|| लिलं यत्र नान्यैर्न्निमित्तैर्न्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात् || नाप्यन्यस्मात्प्रणयकलहाद्वि

४ प्रयोगोपपत्तिर्व्वित्तेशानां न खलु वयो यौवनादन्यदस्ति ||७४|| यत्रोन्मत्तभ्रमरमुखराः पादपा नित्य

पुष्पाः हंसश्रेणीरचितरशना नित्यपुष्पा नलिन्यः || केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापाः नि

त्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः ||७५|| अक्षीणान्तर्भवननिधयः प्रत्यहं रक्तकण्ठैरुद्गाय

द्भिर्द्धनपतियशः किन्नरैर्यत्र सार्द्धं || वैभ्राजाख्यं विबुधवनितावारमुख्यासहायाः बद्धा[illegible]पा बहिरु

पवनं कामिनो निर्विशन्ति ||७६|| यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासितानामङ्गग्लानिं सुरतजनि

तां तन्तुजालावलम्बाः || त्वत्संरोधापगमविशदैश्चन्द्रपादैर्न्निशीथे व्यालुंपन्ति स्फुटजललवस्यन्दिन राम

श्चन्द्रकान्ताः ||७७|| मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं प्रायश्चापं न वहति भयान्मन्मथः षट्पद ||१८||

ज्यं॥सभ्रूभंगंप्रहितनयनैःकामिलक्षेष्वमोघैःस्तस्यारंभश्चतुरवनिताविभ्रमैरेवसिद्धः॥७८॥नेत्रा
नीताःसततगतिनायद्विमानाग्रभूमीरालेख्यानांसलिलकणिकादोषमुत्पाद्यसद्यः॥शंकास्पृष्टा
इवजलमुचस्त्वादृशायत्रजालैर्धूमोद्गारानुकृतिनिपुणाजर्जरानिःपतंति॥७९॥मंदाकिन्याःस
लिलशिशिरैःसेव्यमानामरुद्भिर्मंदाराणामनुतटरुहांछाययावारितोष्णाः॥अन्वेष्टव्यैःकनकसिकता
मुष्टिनिक्षेपगूढैःसंक्रीडंतेमणिभिरमरैःप्रार्थितायत्रकन्याः॥८०॥वासश्चित्रंमधुनयनयोर्विभ्रमादे
शदक्षंपुष्पोद्भेदंसहकिसलयैर्भूषणानांविकल्पान्॥लाक्षारागंचरणकमलन्यासयोग्यंचयस्या
मेकःसूतेसकलमबलामंडनंकल्पवृक्षः॥८१॥तत्रागारंधनपतिगृहादुत्तरेणास्मदीयंदूराल्लक्ष्यंसु
रपतिधनुश्चारुणातोरणेन॥यस्योपांतेकृतकतनयःकांतयावर्द्धितोमेहस्तप्राप्यःस्तवकविनतो
बालमंदारवृक्षः॥८२॥वापीचास्मिन्मरकतशिलाबद्धसोपानमार्गाहैमैश्छन्नाविकचकमलैःस्नि

तोरणोस्मीवर्हिद्वीरं २

पं:४ सुंदरं चारुपेशलं २ वासंती माधवी लता ५

मे·प्र·कृ गन्धवैदूर्यनालैः ॥ यस्यास्तोये कृतवसतयो मानसं संनिकृष्टं नाध्यास्यंति व्यपगतशुचस्त्वामपि प्रेक्ष्य

५९ हंसाः ॥ ८३ ॥ तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणी

१ यः ॥ मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥

८४ ॥ रक्ताशोकश्चलकिसलयः केसरश्चात्र कांतः प्रत्यासन्नौ कुरवकवृतेर्माधवीमंडपस्य ॥ एकः सख्

यास्तव सह मया वामपादाभिलाषी कांक्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥ ८५ ॥ तन्मध्ये च

स्फटिकफलका कांचनी वासयष्टिः मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ॥ तालैः शिंजद्वलयसुभगैर्

नर्तितः कांतया मे यामध्यास्ते दिवसविगमे नीलकंठः सुहृद्वः ॥ ८६ ॥ एभिः साधो मनसि निहितैर्लक्ष

र्ले णैर्लक्षयेथा द्वारोपान्ते लिखितवपुषौ शंखपद्मौ च दृष्ट्वा ॥ क्षामच्छायं भवनमधुना मद्वियोगेन नूनं सूर्

र्यापाये न खलु कमलं पुष्यति स्वामभिख्यां ॥ ८७ ॥ मत्वा सद्यः कमूलेतनुतां शीघ्रसंपातहेतोः क्रीडाशै ल्पम ॥ र्प ॥

नीलकंठो भुजंगभुक् ३

पद्यग्रहिमसंकारांमातिकंपेशिखरंविंदुः २

त्वं प्रथमकथिते रम्यसानौ निषिन्नः ॥ अर्हस्यंतर्भवनपतितां कर्तुमल्पाल्पभासं खद्योतालीविलसित
निभां विद्युदुन्मेषदृष्टिं ॥ ८८ ॥ तन्वी श्यामा शिखरिदशना पक्वबिंबाधरोष्ठी मध्ये क्षामा चकितहरि
णीप्रेक्षणा निम्ननाभिः ॥ श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां या तत्र स्याद्युवतिविषये
सृष्टिराद्येव धातुः ॥ ८९ ॥ तां जानीयाः परिमितकथां जीवितं मे द्वितीयं दूरीभूते मयि सहचरे
चक्रवाकीमिवैकां ॥ गाढोत्कंठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां जातां मन्ये तुहिनमथितां प
द्मिनीं वान्यरूपां ॥ ९० ॥ नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियाया निश्वासानामशिशिर
तया भिन्नवर्णाधरोष्ठं ॥ हस्तन्यस्तं मुखमसकलव्यक्ति लंबालकत्वादिंदोर्दैन्यं त्वदनुसर
णक्लिष्टकांतेर्बिभर्ति ॥ ९१ ॥ आलोके ते निपतति पुरा सा बलिव्याकुला वा मत्सादृश्यं वि
रहतनु वा भावगम्यं लिखंती ॥ पृच्छंती वा मधुरवचनां सारिकां पंजरस्थां कच्चिद्भर्तुः स्मर

उछूनंससोधाक्रि ४

एतेवलिहीनादयः श्लोक ४

मे. दू. सि रसिके त्वं हि तस्य प्रियेति ॥ ८१ ॥ उत्संगे वा मलिनवसने सौम्य निक्षिप्य वीणां मद्गोत्रांकं विरचितप

२० ॥ दं गेयमुद्गातुकामा । तंत्रीमार्द्रां नयनसलिलैः सारयित्वा कथंचिद्भूयो भूयः स्वयमपि कृतां मूर्छनां वि

10 स्मरंती ॥ ८२ ॥ शेषान्मासान्गमनदिवसस्थापितस्यावधेर्वा विन्यस्यंती भुवि गणनया देहलीद

त्तपुष्पैः । मत्संयोगं हृदयविहितारंभमास्वादयंती प्रायेणैते रमणविरहेष्वंगनानां विनोदाः ॥ ८४ ॥

त्रिभिर्विशेषकं = आदिकुलेकं ॥ सव्यापारामहनि न तथा पीडयेत्मद्वियोगः शंके रात्रौ गुरुतरशुचं निर्विनोदां सखीं

ते । मत्संदेशैः सुखयितुमलं पश्य साध्वीं निशीथे तामुन्निद्रामवनिशयनां सौधवातायनस्थैः ॥

८५ ॥ आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वां प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः

॥ नीतां रात्रिं क्षणमिव मया सार्द्धमिच्छारतैर्या तामेवोष्णैर्विरहजनितैरश्रुभिर्यापयंती ॥ ८५ ॥

निश्वासेनाधरकिशलयक्लेशिना विक्षिपंती शुद्धस्नानात्परुषमलकं नूनमागंडलंबी । मत्संयोगः क राम ॥ २० ॥

पुंस्याधिर्म्मानसीव्यथातु

पादानिंदोरमृतशिशिरान्जालमार्गप्रविष्टान्पूर्वप्रीत्या गतमभिमुखं संनिवृत्तं तथैव ॥ चक्षुः खेदात्सलिलगुरुभिः प
क्ष्मभिश्छादयंतीं साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताः ३
थमपि भवेत्स्वप्नजोपीति निद्रामाकांक्षंतीं नयनसलिलोत्पीडरुद्धावकाशां ॥ ९६ ॥ आद्ये बद्धा विरह
दिवसे या शिखा दाम हित्वा शापस्यांते विगलितशुचा सा मयोद्वेष्टनीया ॥ स्पर्शक्लिष्टामयमितन
खेनासकृत्सारयंतीं गंडाभोगात्कठिनविषमामेकवेणीं करेण ॥ ९७ ॥ सा संन्यस्ताभरणमबला
पेलवं धारयंती शय्योत्संगे निहितमसकृद्दुःखदुःखेन गात्रं ॥ त्वामप्यस्रं नवजलमयं मोचयिष्य
त्यवश्यं प्रायः सर्वो भवति करुणावृत्तिरार्द्रांतरात्मा ॥ ९८ ॥ जाने सख्यास्तव मयि मनः संभृतस्नेह
मस्मादित्थंभूतां प्रथमविरहे तामहं तर्कयामि ॥ वाचालं मां न खलु सुभगंमन्यभावः करोति प्र
त्यक्षं ते निखिलमचिराद्भ्रातरुक्तं मया यत् ॥ ९९ ॥ रुद्धापांगप्रसरमलकैरंजनस्नेहशून्यं प्रत्या
देशादपि च मधुनो विस्मृतभ्रूविलासं ॥ त्वय्यासन्ने नयनमुपरिस्पंदि शंके मृगाक्ष्याः मीनक्षोभा
च्चलकुवलयश्रीतुलामेष्यतीति ॥ १०० ॥ वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयैर्मुक्ताजालैश्चि

मे०दू०
॥२२॥

रपरिचितंत्याजितोदैवगत्या॥ संभोगांतेममसमुचितोहस्तसंवाहनानांयास्यत्यूरुःकनककदली
स्तंभगौरश्चलत्वं॥१०१॥ तस्मिन्कालेजलदयदिसालब्धनिद्रासुखास्यात्तत्रासीनस्तनितविमुखोया
ममात्रंसहस्व॥ माभूदस्याःप्रणयिनिमयिस्वप्नलब्धेकथंचित्सद्यःकंठच्युतभुजलताग्रंथिगाढोपगूढं
॥१०२॥ तामुत्थाप्यस्वजलकणिकाशीतलेनानिलेनप्रत्याश्वस्तांसममभिनवैःजालकैर्मालतीनां
॥विद्युद्गर्भःस्तिमितनयनांत्वत्सनाथेगवाक्षेवक्तुंधीरःस्तनितवचनैर्मानिनींप्रक्रमेथाः॥१०३॥
भर्त्तुर्मित्रंप्रियमविधवेविद्धिमामंबुवाहंतत्संदेशैर्मनसिनिहितैरागतंत्वत्समीपं॥ योवृंदानि
त्वरयतिपथिश्राम्यतांप्रोषितानांमंद्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि॥१०४॥ इत्याख्या
तेपवनतनयंमैथिलीवोन्मुखीसात्वामुत्कंठोच्छ्वसितहृदयावीक्ष्यसंभाव्यचैवं॥ श्रोष्यत्यस्मादं
वहितहृदयासोम्यसीमंतिनीनांकांतोदंतःसुहृदुपहृतःसंगमात्किंचिदूनः॥१०५॥ तामायुष्मन्म

मे४

राम
॥२२॥

मद्वचनादात्मनश्चोपकर्तुं ब्रूयादेवं तव सहचरो रामगिर्य्याश्रमस्थः ॥ अव्यापन्नः कुशलमबले पृ
च्छति त्वां वियुक्तः पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥ १०६ ॥ अंगेनांगं प्रतनु तनुना गाढतप्ते तनु २
न तप्तं सास्रेणास्रद्रुतमविरतोत्कंठमुत्कंठितेन दीर्घोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्त्ती
संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ॥ १०७ ॥ शब्दाख्येयं यदपि किल ते यः सखीनां पुर
स्तात्कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् ॥ सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृ
श्यस्त्वामुत्कंठाविरचितपदं मन्मुखेनेदमाह ॥ १०८ ॥ श्यामास्वंगं चकितहरिणीप्रेक्षणे दृष्टिपातं व
क्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ॥ उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासा
न् हन्तैकस्थं क्वचिदपि न ते चंडि सादृश्यमस्ति ॥ १०९ ॥ त्वामालिख्य प्रणयकुपितां धातुरागैः शि
लायामात्मानं ते चरणपतितं यावदिच्छामि कर्तुं ॥ अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते

न्तेक्रूरस्तस्मिन्नपिनसहतेसंगमंनौकृतांतः ॥१०९॥ धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्यबा
लेदूरीभूतंप्रतनुमपिमांपंचबाणःक्षिणोति ॥ धर्मान्तेस्मिन्विगणयकथंवासराणिव्रजेयुर्दिक्संस
क्तप्रविरलघनव्यर्थसूर्यातपानि ॥१११॥ भित्वासद्यःकिशलयपुटान्देवदारुद्रुमाणांयेनत
क्षीरस्रुतिसुरभयोदक्षिणेनप्रवृत्ताः ॥ आलिंग्यंतेगुणवतिमयातेतुषाराद्रिवाताःपूर्वस्पृ
ष्टंकिलयदिभवेदंगमेभिस्तवेति ॥११२॥ संक्षिप्यंतेक्षणइवकथंदीर्घयामास्त्रियामाःसर्वा
वस्थास्वहरपिकथंमंदमंदातपंस्यात् ॥ इत्थंचेतश्चटुलनयनेदुर्लभप्रार्थनंमेगाढोष्माभिःकृ
तमशरणंत्वद्वियोगव्यथाभिः ॥११३॥ इत्यात्मानंबहुविगणयन्नात्मनैवावलंबेतत्कल्याणि
त्वमपिसुतरांमागमःकातरत्वंकस्यात्यंतंसुखमुपनतंदुःखमेकांततोवानीचैर्गच्छत्युपरि
चदशाचक्रनेमिक्रमेण ॥११४॥ मामाकाशप्रणिहितभुजंनिर्दयाश्लेषहेतोर्लब्धायास्तेक

र्थं मपिमयास्वप्नसंदर्शनेषु॥ पश्यंतीनांनखलुवहुशोनस्थलीदेवतानांमुक्तास्थूलास्तरुकिशल
येष्वश्रुलेशाःपतंती॥११५॥ शापान्तोमेभुजगशयनादुत्थितेशार्ङ्गपाणौशेषान्मासानगमयचतु
रोलोचनेमीलयित्वा॥ पश्चादावांविरहगुणितंतंतमात्माभिलाषंनिर्वेक्ष्यावःपरिणतशरच्चंद्रि
कासुक्षपासु॥११६॥ भूयश्चाहत्वमपिशयनेकंठलग्नापुरामेनिद्रांगत्वाकिमपिरुदतीसस्वरं
विप्रवुद्धा॥ सान्तर्हासंकथितमसकृत्पृच्छतश्चत्वयामेदृष्टःस्वप्नेकितवरमयन्कामपित्वंम
येति॥११७॥ एतस्मान्मांकुशलिनमभिज्ञानदानाद्विदित्वामाकौलीनादसितनयनेमय्य
विश्वासिनीभूः॥ स्नेहानाहुःकिमपिविरहेध्वंसिनस्तेत्वभोगादिष्टेवस्तुन्युपचितरसाःप्रे
मराशीभवंति॥११८॥ आश्वास्यैवंप्रथमविरहादुग्रशोकांसखींतांशैलादाशुत्रिनयनवृ
षोत्खातकूटान्निवृत्तः॥ साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापिप्रातःकुंदप्रसवशि

तस्मादद्रेर्निगदितपथः शीघ्रमेत्यालकायां पश्यागारं विगलितविभं दृष्टचिन्हैर्विदित्वा ।। यत्संदिष्टं प्रणयमधुरं गुरु
ह्यकेन प्रयत्नात्तद्गृहिण्याः सकलमवदत्कामरूपी पयोदः ।। ११४ ।। ल
मे॰ दू॰ स्थिरं जीवितं धारयेथाः ।। ११८ ।। कच्चित्सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे प्रत्यादेशान्न खलु
१३ भवतो धीरतां कल्पयामि ।। निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः प्रत्युक्तं हि प्रणयि
13 षु सतामीप्सितार्थक्रियैव ।। १२० ।। एतत्कृत्वा प्रियमनुचितं प्रार्थनावर्त्तिनो मे सौहार्द्दाद्वा विधु
र इति वा मय्यनुक्रोशबुद्ध्या ।। इष्टान्देशान्विचर जलद प्रावृषा संभृतश्रीर्मा भूदेवं क्षणमपि
च ते विद्युता विप्रयोगः ।। १२१ ।। तं संदेशं जलधरवरो दिव्यवाचा चचक्षे प्रोक्तं तस्याः परहित तां ४
शु करो रक्षितुं यक्षवध्वाः ।। श्रुत्वोदन्तं प्रमुदितमनाः सापि तस्थौ स्वभर्तुः केषां न स्यात्परिणतफलं
प्रार्थनास्युत्तमेषु ।। १२२ ।। श्रुत्वा वार्त्तां जलदकथितां तां धनेशोऽपि सद्यः शापस्यान्तं सदयहृदयः सं हृदयः ३
विधायास्तकोपः ।। संयोज्यैतौ विगलितशुचौ दम्पती हृष्टचित्तौ भोगानिष्टानभिमतसुखान्
जोजयामास शश्वत् ।। १२३ ।। इति श्री कालिदासकृतं मेघदूतकाव्यं समाप्तं ।। ।। शुभमस्तु ।। ।। राम १३

उत्तर